Who knows thus the Āmnāyas in Essence he, O Devi, is venerable, a Sadguru, adorable, knower of the Deities and Mantras, deserves service and obeisance. He is worth seeing, of pure conduct, devout, ascetic, performer of religious rituals, a worshipper, scholar of all the sciences of Vedas, Āgamas and Śāstras, an Ācarya and a Kaulika He is performer of sacrifices, purified in self, reciter of Mantras and a Sādhaka. He is Yogī, a satisfied person, a Vīra and the best. He is pious, all-knower, emancipated and himself Śiva.

तत्कुलं पावनं देवि धन्या तज्जननी स्मृता ।
तत्पिता च कृतार्थः स्यान्मुक्तास्तत्पितरः प्रिये ।
पुण्यास्तद्वंशजाः सर्वे पूतास्तन्मित्रबान्धवाः ॥ ३७ ॥

His family is sacred; his mother, O Devi, is blessed; his father redeives the fulfilment of all his desires and his fore-fathers are all liberated; even his entire lineage, fraternity and his friends are all purified.

1465

बहुनेह किमुक्तेन चोर्ध्वाम्नायपरस्य च ।
स्मरणं कीर्त्तनं वापि दर्शनं वन्दनं तथा ।
सम्भाषणञ्चकुरुते राजसूयाधिकं फलम् ॥ ३८ ॥
स यत्र वसते देवि तत्र श्रीर्विजयोत् भवेत् ।
अनामयं सुभिक्षञ्च सुवृष्टिर्निरुपद्रवम् ॥ ३९ ॥

Eulogy of the Knower of Ūrdhvāmnāya :

Why to say much, one who remembers, sings eulogises, praises, sees, and converses with the knower of Ūrdhvāmnāya obtains greater fruit than the performance of a Rājasūya sacrifice. Wherever such a person lives, there reside Goddess Lakṣmī and victory. That place, rid of all diseases, becomes full of grains, receives good rainfall, is free of disturbances, and peace reigns there.

तस्माद् गुरुप्रसादेन ऊर्ध्वाम्नायं नरोत्तमः ।
यो वेत्ति तत्त्वतो देवि स मे प्रियतमो भवेत् ॥ ४० ॥

Therefore that best of men, who knows the Ūrdhvāmnāya by the Grace of the Guru, becomes, O Devi, My favourite.

पूर्वाम्नायः सृष्टिरूपः स्थितिरूपश्च दक्षिणः ।
संहारः पश्चिमो देवि उत्तरोऽनुग्रहो भवेत् ॥ ४१ ॥

Distinction of Āmnāas based on Creation etc :

Central Truth of Pūrvāmnāya is *Sṛṣṭi* (Creation), of the Dakṣiṇa is maintenance (*Sthiti*), of Paścima is Destruction (*Saṁhāra*), and that of Uttara is Compassion (*Anugraha*).

मन्त्रयोगं विदुः पूर्वं भक्तियोगञ्च दक्षिणम् ।
पश्चिमं कर्मयोगञ्च ज्ञानयोगं तथोत्तरम् ॥ ४२ ॥

Distinction of Āmnāyas on the basis of Paths :

The Path of Pūrva is Mantra Yoga, of Dakṣina is Bhakti

Yoga, of Paścima is Karma Yoga and of Uttara is Jñāna Yoga.

पूर्वाम्नायस्य सङ्केताश्चतुर्विंशतिरीरिताः ।
दक्षिणाम्नायसङ्केताः पञ्चविंशतिरीरिताः ॥ ४३ ॥
पश्चिमाम्नायसङ्केता द्वात्रिंशत् समुदाहृताः ।
विदुः षट्त्रिंशदाम्नाये सङ्केताः श्रीमदुत्तरे ॥ ४४ ॥

Distinction of Āmnāyas on the basis of the number of Principles :

The Principles of Pūrva-āmnāya are twentyfour, of Dakṣiṇa-āmnāya are twentyfive, of Paścima-āmnāya are said to be thirty-two, and that of Ūttara-āmnāya know it to be thirtysix.

ऊर्द्ध्वाम्नायस्य चैतानि न सन्ति कुलनायिके ।
साक्षाच्छिवस्वरूपत्वान्न किञ्चित् कर्म विद्यते ॥ ४५ ॥

In Ūrdvāmnāya there is absence of all the above :

O Kulanāyike ! There are none of these in the Ūrdhvāmnāya. Being directly of the Form of Śiva, there is no existence of Karmas left in it.

उर्ध्वाम्नायस्य माहात्म्यमहं वेद्मि न चापरः ।
मत्स्नेहात्त्वञ्च जानासि सत्यमेतद्वरानने ॥ ४६ ॥
ऊर्ध्वाम्नायस्य माहात्म्यमिति ते कथितं मया ।

O Varānane ! the Glory of Ūrdhvāmnāya is known only to Me and to none else. From My love for You truly You also know. Thus I told you the Glory of the Ūrdvāmnāya.

समासेन कुलेशानि मन्त्रमाहात्म्यमुच्यते ॥ ४७ ॥
इतः पूर्वं मया नोक्तं यस्य कस्यापि पार्वति ।
तद्वदामि तव स्नेहाच्छृणु मत्प्राणवल्लभे ॥ ४८ ॥

Glory of the Śrī-prāsāda-parā Mantra in the Form of Śiva-Śakti :

O Kuleśāni ! I am now telling You the Great Mantra. O Pārvati ! I have never before told it to anyone. Now, O Beloved of My Life, I am telling it only out of love, which please listen.

श्रीप्रासादपरामन्त्रमूर्ध्वाम्नायमधिष्ठितम् ।
आवयोः परमाकारं यो वेत्ति स स्वयं शिवः ॥ ४९ ॥

The Śrī-prāsāda-parā (i. e. Haṁsa Mantra)[1] is the Mantra presiding over the Ūrdhvāmnāya. This Mantra is the full form of Both of Us. One who knows it thus is Śiva Himself.

शिवादिक्रिमिपर्यन्तं प्राणिनां प्राणवर्त्मना ।
निश्वासोच्छ्वासरूतेण मन्त्रोऽयं वर्त्तते प्रिये ॥ ५० ॥

The whole World is inherent in this Prāsāda Mantra :

From Śiva to a Krimi (tiniest worm) all the organisms keep on repeating this Mantra in the form of Expiration and Inspiration of breath.

अनिलेन विना मेघो यथाकाशे न वेष्टते ।
पराप्रासादमन्त्रेण विना लोकस्तथा प्रिये ॥ ५१ ॥

Just as clouds do not stay in the sky without wind, so this world cannot exist without this Parā-prāsāda Mantra.

पराप्रासादमन्त्रेण स्यूतमेतच्चराचरम् ।
अभिन्नं तत्त्वतो देवि तालवृन्ते यथानिलः ॥ ५२ ॥
बीजेऽङ्कुरस्तिले तैलमग्नावुष्णं रवौ प्रभा ।
चन्द्रे ज्योत्सनाऽनलः काष्ठे पुष्पे गन्धे जले द्रवः ॥ ५३ ॥

---

1. In this Mantra the *Ha* stands for Śiva, the Puruṣa or the Male Principle; *Sa* stands for Śakti, the Prakṛti, or the Female Principle. Both together make creation and are so present in each form in creation. The outgoing breath, the expiration spells *Ha* and incoming breath, the inspiration spells *Sa*. This automatic repetition of Ha-Sa during the continuous movement of breathing of the Jīvas is called Ajapā Japa, i. e. Japa or repetition without effort. It is said that the number of times during one day and night one repeats this Haṁsaḥ Mantra is 21,600. Cf. "*Haṁkāreṇa bahiryāti saḥkāreṇa viśet punaḥ. Haṁse ti paramaṁ mantram Jīvo japati sarvadā*". Niruttar Tantra IV. 20. also Cf. Dhyānabindūpaniṣad ,61-64.

शब्दे चार्थः शिवे शक्तिः क्षीरे सर्पिः फले रुचिः ।
शर्करायाश्च माधुर्यं घनसारे च शीतलम् ॥ ५४ ॥
निग्रहानुग्रहो मन्त्रे प्रतिमायाश्च देवता ।
दर्पणे प्रतिबिम्बश्च समीरे चलनं यथा ।
पराप्रसादमन्त्रेऽपि प्रपञ्चोऽयं तथा स्थितः ॥ ५५ ॥

The whole mobile and immobile creation is pervaded by the Parā-prāsāda Mantra. Essentially the two are inseparable. Just like air in the fan, sprout in the seed, oil in the sesamum, heat in the fire, light in the Sun, moonlight in the moon, fire in the wood, fragrance in the flower, moisture in the water, meaning in the word, Śakti in Śiva, clarified butter in milk, taste in fruit, sweetness in sugar, cold in camphor, restraint and favour in the Mantra, Devatā in the Idol, reflection in the mirror and movement in the wind; so all the activity of this creation is situate in this *parā-prāsāda* Mantra.

वटबीजे यथा वृक्षः सूक्ष्मरूपेण तिष्ठति ॥
पराप्रासादमन्त्रेऽस्मिन् ब्रह्माण्डोऽपि तथा स्थितः ॥ ५६ ॥

Just as the huge tree exists in a subtle form in the Baṭa-seed (seed of Indian Fig-tree, Ficus Indica), similarly the whole universe exists in the *parā-prāsāda* Mantra.

सुपक्वेषु पदार्थेषु सुरसेषु कुलेश्वरि ।
लवणेन विना स्वादु यथा भोक्तुर्न जायते ॥ ५७ ॥
पराप्रासादमन्त्रेण ये वा मन्त्रा न सङ्गताः ।
ते फलं न प्रयच्छन्ति मन्त्रंशक्तिविवर्जिताः ॥ ५८ ॥

Mantras without the accompaniment of Parā-prāsāda are ineffective :

O Kuleśvari ! Just as excellently cooked and juicy things without salt are not felt tasty by one who eats them, so the Mantras that are not conjoined with this great Mantra do not yield fruit because thus they become devoid of their own potency.

श्रीप्रासादपरामन्त्रो गोपनीयः प्रयत्नतः ॥ ५९ ॥

This Śrī-prāsāda-parā Mantra should with efforts be kept a secret.

विचार्याहं पुराणार्थान् दर्शनाम्नायभेदजान् ।
असमान् वेदम्यहं मन्त्रान् शास्त्राणि विविधानि च ॥ ६० ॥

I know all the meanings of Purāṇas, Mantras and various Śāstras originating out of the distinctions of the Darśanāmnāyas.

सहस्राक्षादयो देवाः शास्त्रेषु विविधेषु च ।
भ्रमन्ति तेषु मूढास्ते तव मायाविमोहिताः ॥ ६१ ॥
जायन्ते च म्रियन्ते च संसारक्लेशभागिनः ।
श्रीप्रासादपरामन्त्रं न गायन्तः कुलेश्वरि ।
न लभन्ते हि मोक्षं ते तव मायाविमोहिताः ६२ ॥

Bewildered by Your Māyā the fools and even the Sahasrākṣa (Indra) etc., Devatas wander in the maze of the varied Śāstras, and in the midst of pains of the world they repeatedly take birth and die; yet, O Kuleśāni they do not sing the Śrī-parā-prāsāda Mantra. Thus deluded by Your Māyā they do not obtain Emancipation.

मद्रूपे श्रीगुरौ यस्य दृढा भक्तिः प्रजायते ।
श्रीप्रासादपरामन्त्रं स ज्ञात्वा परिमुच्यते ॥ ६३ ॥

One who has firm faith and devotion in a Guru who is My own Form, knowing the Śrī-prāsāda-parā Mantra attains Emancipation.

पूर्वजन्मसहस्रेषु शैवादिसमयोद्ययतान् ।
चतुराम्नायजान् मन्त्रान् गुर्वाज्ञां यो भजिष्यति ॥ ६४ ॥
स पापकञ्चुकान्मुक्तः शुद्धात्मा गुरुवत्सलः ।
श्रीप्रासादपरामन्त्रं विजानाति न चान्यथा ॥ ६५ ॥

In hundreds of previous births abiding by the Śaiva etc., Dharmas and with the command of Guru who worships the Mantras of the four Āmnāyas, only he, freeing himself from the cloak of sins becomes pure in Soul, earns favour of his Guru, knows the Śrī-prāsāda-parā Mantra from him, none else.

सब्रह्मविष्णुरुद्राश्च शक्रादिसुरपुङ्गवाः ।
वसुरुद्रार्कदिक्पाला मनुचन्द्रादयः प्रिये ॥ ६६ ॥
मार्कण्डेयादिमुनयो वसिष्ठादिमुनीश्वराः : ।
सनकद्याश्च योगीशा जीवन्मुक्ताः शुकादयः ॥ ६७ ॥

यक्षकिन्नरगन्धर्वाः सिद्धविद्याधरादयः ।
श्रीप्रासादपरामन्त्रप्रभवञ्चामितं फलम् ।
प्राप्य मन्त्रमिमं पुण्यं जपन्त्यद्यापि पार्वति ॥ ६८ ॥

Even the Gods and Sages also recite prāsāda-parā Mantra :

O Pārvati ! Brahmā, Viṣṇu, Rudra, and Śakra etc., superior Devas, Vasus, Rudrārka, Dikpālas, Manu, Moon etc., Markaṇḍeya and Vasiṣṭha etc. sages, Sanaka etc., released persons, and Yakṣas, Kinnaras, Gandharvas, Siddhas, Vidyādharas—all these obtaining this infinitely effective and fruit-giving Śrī-prāsāda-parā Mantra, recite it even today.

सामर्थ्यं पूज्यता विद्या तेजः सौख्यमरोगिता ।
राज्यं स्वर्गश्च मोक्षश्च पराप्रासादजापिनः ॥ ६९ ॥
ब्रह्मेन्द्ररुद्रविष्णूनामपि दूरायते पदम् ।
सर्वकर्मविहीनोऽपि पराप्रासादमन्त्रवित् ।
सुखेन यां गतिं याति न तां सर्वेऽपि धार्मिकाः ॥ ७० ॥

To him who recites the Parā-prāsāda Mantra come capacity, reverence, knowledge, lustre, happiness, freedom from disease, kingdom, heaven and liberation. He obtains a place higher than Brahmā, Indra, Rudra, and Viṣṇu. Though devoid of all rituals, yet if he takes to this Parā-prāsāda, he treks on a happy path which none of the followers of other Dharmas can hope of.

तस्य चिन्तामणिः कामधेनुः कल्पतरुर्गृहे ।
कुबेरः किङ्करः साक्षात् पराप्रासादजापिनः ॥ ७१ ॥

At the house of the reciter of parā-prāsāda reside Cintāmaṇi (a jewel which gives relief from all worries), Kāmadhenu (the Divine cow), Kalpataru (the Divine tree which fulfils all desires), and he is served even by Kubera himself.

यथा दिव्यमणि स्पर्शाल्लौहो भवति काञ्चनम् ।
पराप्रासादजापाच्च पशुः पशुः पशुपतिर्भवेत् ॥ ७२ ॥

Just as with a touch of the Divine Gem even iron becomes gold, so by the repetition of parā-prāsāda a *paśu* becomes the Lord of Paśus (Śiva).

श्रीप्रासादपरामन्त्रं यो विजानाति तत्त्वतः ।
स मां त्वाञ्च विजानाति चावयोरप्यतिप्रियः ॥ ७३ ॥

One who knows the Truth of Śrī-prāsāda-parā Mantra comes to know Mine and Your Truth, and becomes Our favourite.

पराप्रासादमन्त्रज्ञः श्वपचोऽपि हि पार्वति ।
देवतास्थापने शक्तः प्रतिमादौ न संशयः ॥ ७४ ॥

Man of the lowest class, if knows Parā-prāsāda Mantra can instal an Idol of a Devatā :

Even if the knower of the parā-prāsāda Mantra is of the lowest class he obtains the right to instal an Idol of a Devatā, there is no doubt about it.

मन्त्रमात्रन्तु यो वेत्ति पराप्रासादसंज्ञकम् ।
श्वपचोऽपि हि मुच्येत किं पुनस्तद्विधानवित् ॥ ७५ ॥

A Cāṇḍāla also, who knows even only the Mantra named parā-prāsāda, becomes liberated, then what to say about a person who knows the full rituals of this Mantra.

पराप्रासादमन्त्रज्ञो यत् करोति यदिच्छति ।
यद्ब्रूते तन्महेशानि तपो ध्यानं जपो भवेत् ॥ ७६ ॥

Whatever a knower of parā-prāsāda Mantra does, desires or speaks all that, O Maheśāni, becomes austerity, concentration and recitation.

दीक्षापूर्वं महेशानि पारम्पर्यसमन्वितम् ।
पराप्रासादमन्त्रं यो वेत्ति सोऽहं न संशयः ॥ ७७ ॥

Whoever, O Maheśāni, knows the parā-prāsāda Mantra loaded with traditions and received through Initiation, undoubtedly becomes Myself.

चराचरसमेतानि भुवनानि चतुर्दश ।
पराप्रासादमन्त्रज्ञदेहे तिष्ठन्ति नित्यशः ॥ ७८ ॥

All these fourteen worlds with all their mobile and immobile population remain always stationed in the body of the Knower of parā-prāsāda Mantra.

पराप्रासादमन्त्रज्ञो यत्र तिष्ठति भाविनि ।
दिव्यक्षेत्रं समुद्दिष्टं समन्ताद्दशयोजनम् ॥ ७९ ॥

Wherever the knower of parā-prāsāda Mantra resides, that place and all the places around it upto the distance of ten Yojanas (Indian measure of distance) are considered a Divine-area.

परप्रासादमन्त्रार्थतत्त्वज्ञं कुलनायिके ।
सुरासुराश्च वन्दन्ते किं पुनर्मानवादयः ॥ ८० ॥

O Kulanāyike ! Even Gods and Demons both worship the knower of Truth of Meaning of parā-prāsāda Mantra, then what to say of men.

पराप्रासादमन्त्रज्ञो यत्र तिष्ठति पार्वति ।
सिद्धक्षेत्रं मदीयं वा मुनिर्देवगणैः सह ॥ ८१ ॥

O Pārvati ! Wehrever resides the knower of parā-prasāda Mantra, that place is considered by the Sages and Gods as My Siddha place.

शैव वैष्णवदौर्गार्कगाणपत्येन्दुसम्भवान् ।
सर्वमन्त्रान् स जानाति पराप्रासादमन्त्रवित ॥ ८२ ॥

Knower of parā-prāsāda Mantra has the Knowledge of all the Śaiva, etc., Mantras :

The Knower of parā-prāsāda Mantra knows all the Śaiva, Vaiṣṇava, Śākta, Saura, Gāṇapatya and Cāndra Mantras.

श्रीप्रासादपरामन्त्रो जिह्वाग्रे यस्य वर्त्तते ।
तस्य दर्शनमात्रेण श्वपचोऽपि विमुच्यते ॥ ८३ ॥

Prāsāda-parā Mantra is bestower of all Fruits :

On whose tip of the tongue resides the Śrī-prāsāda-parā Mantra, his mere sight liberates even the lowest class of people.

ब्राह्मणो वाऽन्त्यजो वापि शुचिर्वाप्यशुचिः प्रिये ।
पराप्रासादजापी यः स मुक्तो नात्र संशयः ॥ ८४ ॥

Whether a Brāhmin or an untouchable, whether pure or impure, all are liberated by the recitation of Parā-prāsāda.

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।
पराप्रासादमन्त्रोऽयं देवेशि न च निष्फलः ॥ ८५ ॥

Whether this parā-prāsāda Mantra is recited while walking, standing, waking, or dreaming, O Deveśi ! it is never Fruitless.

चिरेणैकैकफलदा मन्त्राः सन्ति सहस्रशः ॥ ।
कुलेशि मन्त्रराजोऽयं शीघ्रं सर्वफलप्रदः ॥ ८६ ॥

Each of the thousands of popular Mantras bestow only one fruit and that too, after a considerable lapse of time; but O Kuleśi ! this King of Mantras very soon provides all the Fruits.

पराप्रासादमन्त्रोऽयं सर्वमन्त्रोत्तमोत्तमः ।
ज्ञानतोऽज्ञानतो वापि भजतां कामदो मनुः ॥ ८७ ॥

This parā-prāsāda Mantra is best among all Mantras. Whether recited with full knowledge or even without knowledge this Mantra always provides desired Fruits.

शचीन्द्रौ रोहिणीचन्द्रौ स्वाहाग्नी च प्रभारवी ।
लक्ष्मीनारायणौ वाणीधातारौ रात्रिवासरौ ॥ ८८ ॥

अग्नीषोमौ बिन्दुनादौ देवि प्रकृतिपूरुषौ ।
आधाराधेयनामानौ भोगमोक्षौ कुलेश्वरि ॥ ८९ ॥

प्राणापानौ च वागर्थौ प्रिये विधिनिषेधकौ ।
सुखदुःखादि यद् द्वन्द्वं दृश्यते श्रूयते मया ।
सर्वलोकेषु तत् सर्वमावामेव न संशयः ॥ ९० ॥
पुंस्त्रीरूपाणि सर्वाणि चावयोरंशकानि हि ।

Śacī-Indra, etc., duals are all Forms of Śakti-Śiva :

Śaci and Indra, Rohiṇī and Candra, Svāhā and Agni, Prabhā (light) and Sun, Lakṣmī and Nārāyāṇa (Viṣṇu), Vāṇī (Goddess Sarasvatī) and Dhātā (Brahmā), Night and Day, Agni and Soma, Bindu and Nāda, Prakṛti and Puruṣa, Support and Supported, Enjoyment (Bhoga) and Emancipation (Mokṣa), Prāṇa and Apāna (two major vital breaths), Word and Meaning. Injunction and Prohibition, Happiness and Misery, all these manifestations that are seen and heard in the world in pairs, are, O Kuleśvari ! representations of Our own Dual Form; there is no doubt about it. All the Male and Female forms are emanations of Our (Śiva-Śakti) own portions.

परप्रासादमन्त्रोऽयं तस्मात् सर्वात्मको भवेत् ॥ ९१ ॥

Parā-prāsāda Mantra is Unity of all Forms :
This parā-prāsāda Mantra is a unity of all Forms :

अरूपं भावनागम्यं परं ब्रह्म कुलेश्वरि ।
निष्कलं निर्मलं नित्यं निर्गुणं व्योमसन्निभम् ॥ ९२ ॥
अनन्तमव्ययं तत्त्वं मनोवाचामगोचरम् ।
पाराप्रासादमन्त्रार्थसन्धानात् सम्प्रकाशते ॥ ९३ ॥

O Kuleśvari ! This (parā-prāsāda Mantra) is Formless, known only through Feeling of Faith. It is Paraṁ Brahman, devoid of all Parts, Blotless, Eternal, Attributeless, like Ether, Infinite, Imperishable, and Truth beyond Mind and Speech. The meaning of this parā-prāsāda shines forth only through Concentration.

तस्मान्मन्त्रमिदं देवि पराप्रासादसंज्ञकम् ।
परतत्त्वस्वरूपत्वात् सच्चिदानन्दलक्षणात् ॥ ९४ ॥

Therefore, O Devi ! This Mantra is named parā-prāsāda and it is the Form of Supreme Reality. *Sat*, *Cit*, and *Ānanda* are its mark.

शिवशक्तिमयत्वाच्च भुक्तिमुक्तिप्रदानतः ।
सकर्मापि च निष्कर्म सगुणञ्चापि निर्गुणम् ॥ ९५ ॥

This is pervaded with Śiva-Śakti and provides both Enjoyment and Emancipation. Being full of actions, it is devoid of actions; being full of attributes it is attributeless.

श्रीप्रासादपरामन्त्रं सर्वमन्त्रशिरोमणि ।
जपन् भुक्तिञ्च मुक्तिञ्च लभते नात्र संशयः ॥ ९६ ॥

This Śrī-prāsāda-parā Mantra is the Crest Jewel of all Mantras. One who recites it, undoubtedly obtains both Enjoyment and Emancipation.

बहुनात्र किमुक्तेन सर्वसारं शृणु प्रिये ।
श्रीप्रासादपरामन्त्रसमं मन्त्रं न विद्यते ॥ ९७ ॥
इदमेव परं ज्ञानमिदमेव परं तपः ।
इदमेव परं ध्यानमिदमेव परार्चनम् ॥ ९८ ॥

इदमेव परा दीक्षा इदमेव परो जपः ।
इदमेव परं तत्त्वमिदमेव परं व्रतम् ॥ ९९ ॥
इदमेव परो यज्ञ इदमेव परात् परम् ।
इदमेव परं श्रेय इदमेव परं फलम् ॥ १०० ॥
इदमेव परं ब्रह्म इदमेव परा गतिः ।
इदमेव परं गुह्यं सत्यं सत्यं न संशयः ।
इति मत्वा मनुवरं तन्निष्ठः स्यात् सदा प्रिये ॥ १०१ ॥

Eulogy of Śrī-prāsāda-parā Mantra :

What is the use of saying much. Listen, O My Beloved ! the Essence of everything. There is no Mantra equal to Śrī-prāsāda-parā Mantra. This is the Supreme Knowledge, this is supreme Austerity, this is supreme Concentration, this is supreme Worship, this is supreme Initiation, this is supreme Recitation (*Japa*), this is supreme Truth, this is supreme Observance (*Vrata*). this is supreme Sacrifice, this is supreme Beyond, this is supreme Blessedness; this is supreme Fruit, this is supreme Brahman, this is supreme Goal, this is supreme Mystery, indubitably the Truth of Truths. Knowing it thus men should always remain dedicated to it.

आमोक्तेन विधिना क्रमपूजापुरःसरम् ।
श्रीप्रसादपरामन्त्रं शतमष्टोत्तरं जपेत् ।
मुच्यते ब्राह्महत्यादिमहापापैश्च पञ्चभिः ॥ १०२ ॥

Method of Recitation of Śrī-prāsāda-parā Mantra :

Following the method laid down by the Āgamas, and beginning with the prescribed way of worship one should recite this Śrī-prāsāda-parā Mantra one hundred and eight times. This provides liberation from five great sins including Brahmanicide, etc.

द्विशतं यो जपेद्देवि श्रीप्रासादपरामनुम् ।
चतुरशीतिलक्षांशाधारगाचरितैरपि ॥ १०३ ॥
स्वयोनिजाङ्गचरितैरसंख्यजननार्जितैः ।
वार्द्धके यौवने बाल्ये जाग्रत्स्वप्नसुषुप्तिषु ॥ १०४ ॥
कर्मणा मनसा वाचा ज्ञानाज्ञानकृतैरपि ।

महापातकसङ्घैश्च ह्युपपातककोटिभिः ।
मुच्यते नात्र सन्देहः सत्यमेतद्वरानने ॥ १०५ ॥

One who recites it two hundred times, becomes liberated from all the group of sins whether done by mind, action or speech either advertently or inadvertently during the childhood, youth, oldage; during waking, sleeping, and dreaming states of all the previous births in the 84,00,000 of species. O Varānane ! there is no doubt about it.

त्रिशतं यो जपेद्देवि श्रीप्रासादपरामनुम् ।
सर्वक्रतुषु यत् पुण्यं सर्वदानेषु यत् फलम् ॥ १०६ ॥
सर्वव्रतेषु यत् पुण्यं सर्वतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि नात्र कार्या विचारणा ॥ १०७ ॥

One who recites it three hundred times obtains the merits of nll kinds of sacrifices, fruits of all kinds of charities, merits of all Vratas and fruits of all sacred places. That he gets all these is true and there is no reason for a second thought about it.

चतुःशतं जपेद् यस्तु श्रीप्रासादपरामनुम् ।
सदा तस्य गृहद्वारे ह्यणिमाद्यष्टसिद्धयः ।
सेवन्ते नात्र सन्देहः सर्वसिद्धिसमन्विताः ॥ १०८ ॥
यद् यन्मनोऽभिलषितं तत्तत् प्राप्नोत्यसंशयः ।
धर्मार्थकाममोक्षाश्च साक्षात्तस्य करे स्थिताः ॥ १०९ ॥
सालोक्यप्रमुखां देवि लभेन्मुक्तिं चतुर्विधाम् ।
सत्यमेतन्न सन्देहः साधकः कुलनायिके ॥ ११० ॥

When one recites Śrī-prāsāda-parā Mantra four hundred times then at the door of his house all the eight Aṇimā etc., Attainments along with all other Attainments always stand in waiting. There should be no doubt about it. Whatever desires he has are all indubitably fulfilled. The Dharma, Artha, Kama, and Mokṣa (four aims of normal Hindu life) are placed, as it were, in his hand and he obtains Sālokya (Śiva's world) etc., four kinds of Emancipations. O Kulanāyike ! This is really true for such a Sādhaka.

जपेत् पञ्चशतं यस्तु श्रीप्रासादपरामनुम् ।
तत्फलं नैव शक्नोमि कथितुं कुलनायिके ॥ १११ ॥

O Kulanāyike ! It is beyond My power to describe the fruits received by one who recites the Sri-prāsāda-parā Mantra five hundred times.

तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ।
श्रीप्रासादपरामन्त्रं जपेद् भुक्तिविमुक्तये । ॥ ११२ ॥

Srī-prāsāda-parā Mantra provides both Enjoyment and Emancipation :

Therefore, in order to obtain Emancipation, one should with all his efforts, in all conditions and always recite the Srī-prāsāda-parā Mantra.

नास्ति गुर्वधिकं तत्त्वं न शिवाधिकदैवतम् ।
न हि वेदाधिका विद्या न कौलसमदर्शनम् ॥ ११३ ॥
न कुलादधिकं ज्ञानं न ज्ञानदधिकं सुखम् ।
नाष्टाङ्गादधिका पूजा न हि मोक्षाधिकं फलम् ।
इदं सत्यमिदं सत्यं सत्यं सत्यं न संशयः ॥ ११४ ॥

There is no Truth higher than the Guru; there is no Devatā greater than Śiva; there is no science greater than Veda; there is no philosophy equal to Kaula; no knowledge greater than Kula; no happiness greater than Knowledge; no worship greater than Aṣṭāṅga worship; and no Fruit greater than Enancipation. This is the Truth, the sole Truth, the Truth indubitable.

श्रीप्रासादपरान्त्रमाहात्म्यमिह वर्णितुम् ।
न शक्नोमि वरारोहे कल्पकोटिशतैरपि ॥ ११५ ॥

I cannot describe, O Varārohe ! the glory of Srī-prāsāda-parā Mantra even in a hundred million Kalpas.

गिरौ सर्षपमात्रन्तु सागरे वालुका यथा ।
तथा च मन्त्रमाहात्म्यं किञ्चित्ते कथितं मया ॥ ११६ ॥

However, , as far as mustard may give an idea of the mountain or a sand particle may give an idea of the ocean that far I have told You the Glory of this Mantra.

ऊर्ध्वाम्नायस्य माहात्म्यं श्रीप्रासादपरामनोः ।
इति ते कथितं देवि किं भूयः श्रोतुमिच्छसि ॥ ११७ ॥

Thus I have described to You, O Devi ! the Srī-prāsāda-parā Mantra and the Urdhvāmnāya. Now what else You want to hear.

इति श्रीकुलार्णवे निर्वाणमोक्षद्वारे महारहस्ये
सर्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चम-
खण्डे ऊर्ध्वाम्नायतन्त्रे श्री प्रासादपरा-
मन्त्रकथनं नाम तृतीय उल्लासः ॥

चतुर्थ उल्लासः

श्रीदेव्युवाच ।

कुलेश श्रोतुमिच्छामि श्रीप्रासादपरामनुम् ।
मन्त्रराजं वदेशान न्यासध्यानादिभिः सह ॥ १ ॥

Śrī Devi said :

O Īśāna ! I want to hear about the Śrī-prāsāda-parā Mantra. Kindly tell Me about that King of Mantras along with its Nyāsa and Dhyāna.

श्रीईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण शिवाकारः प्रजायते ॥ २ ॥

Śrī Īśvara said :

Listen, O Devi ! I am telling you what You have asked. By merely hearing it one becomes like Śiva.

इतः पूर्वं मया नोक्तो मन्त्रोऽयं यस्य कस्यचित् ।
तव स्नेहाद्वदाम्यद्य शृणु मत्प्राणवल्लभे ॥ ३ ॥

I have never told this Mantra to anyone prior to this moment. Out of My love for You I will now tell it. O Beloved of My life, listen.

अनन्तचन्द्रभुवनमिन्दुबिन्दुयुगान्वितः ।
श्रीप्रासादपरामन्त्रो भुक्तिमुक्तिफलप्रदः ॥ ४ ॥
पराप्रासादमन्त्रस्तु सादिरुक्तः कुलेश्वरि ।

Extrication of the Śrī-prāsāda-parā Mantra :

Ananta Candra is Nāda-Bindu (ँ), Bhuvana is Aukāra (ौ), Bindu is Hakāra (ह) and Bindu Yuga is Sakāra (स). Thus the Śrī-prāsāda-parā Mantra is Hsauṁ (हसौं). It is the bostower of both Enjoyment and Emancipation. O Kule-

śvarī ! The prāsāda-parā Mantra is said to begin with Sa, that is, it is Shauṁ (स्हौं).

प्रकाशानन्दरूपत्वात् प्रत्यक्षफलदानतः ॥ ५ ॥
प्रसन्नचित्तवश्यत्वात् प्रसिद्धार्थनिरूपणात् ।
प्राक्तनाघप्रशमनात् प्रपन्नार्त्तिविनाशनात् ।
प्रसादकरणाच्छीघ्रं प्रासादमनुरीरितः ॥ ६ ॥

Word-meaning of Prāsāda Mantra :

Being of the form of Prakāśānanda (Bliss of Light), due to yielding direct Fruits, being captivated by a pleasant mind, due to explaining the famous meaning, due to pacifying the former sins, due to destroying the pains of those who resort to it, and being pleased very soon, this Mantra has been called Prāsāda.

परतत्त्वस्वरूपत्वात् परमात्मप्रकाशनात् ।
परमानन्दजननात् परधर्मनिदर्शनात् ॥ ७ ॥
परोक्षफलदानाच्च परमैश्वर्यकारणात् ।
परत्वात् सर्वमन्त्राणां परामन्त्र इतीरितः ॥ ८
कुलमन्त्रमिदं देवि न्यासं शृणु वदामि ते ।

Being of the form of Truth Beyond, due to throwing light on the Self Beyond, due to providing the Bliss Beyond, due to expounding the Dharma Beyond, due to providing Fruits Beyond, being the cause of Affluence Beyond, and being Beyond comparison with other Mantras, this has been called Parā (Beyond) Mantra. This is the Kula Mantra. Now listen to its Nyāsa.

आदौ प्रातः समुत्थाय गुरुदेवानुचिन्तनम् ॥ ९ ॥
कन्दमूले मनः कृत्वा कुर्याद्विण्मूत्रमोचनम् ।
शौचास्यशोधनं स्नानं सन्ध्यातर्पणमाचरेत् ॥ १० ॥
एकान्ते द्वारयजनं विघ्नत्रयनिवारणम् ।
पूजास्थानप्रवेशश्च तथासनोपवेशनम् ॥ ११ ॥

Delineation of Duties prior to Nyāsa :

First of all, rising in the morning one should concentrate upon the Guru. Then, after remembering the Kula-Mantra,

one should relieve himself of the nature's call etc. After that, washing of the mouth, bathing, morning prayer and presentation of libations of water should be done. Thereafter, performing the door-worship in an isolated manner and driving away all the three obstacles (Daivika, atmospheric and terrestrial) one should enter into the place of worship and occupy the proper seat.

देवीपूजागृहध्यानं शिवादिगुरुवन्दनम् ।
आसनं गणपक्षेत्रपालवन्दनमीश्वरि ॥ १२ ॥

Then, O Īśvarī ! the Sādhaka should concentrate on the house of Devi's worship, submit prayers to Śiva and Guru, purify the Seat, and pray to Gaṇapati and Kṣetrapālas.

पादुकास्मरणञ्चैव दिननाथार्चनं प्रिये ।
कराङ्गशोधनं प्राणायामः स्वब्रह्मरन्ध्रके ॥ १३ ॥

Thereafter, O Beloved ! Remembering the Guru-pādukā-mantra and worshipping the Dina-nātha (Sun), one should purify his hands and body, and then devoting his mind to the Brahmarandhra perform Prāṇāyāma.

दिग्बन्धनञ्चाङ्गयुग्म विधियुक्ताश्च मातृकाम् ।
दशप्रकारभूताख्यां लिपिं कमठसंज्ञकाम् ॥ १४ ॥

After Digbandha two Aṅga-nyāsas, ten Mātṛkā-nyāsas (1. Antra-mātṛkā-nyāsa; 2-4. the three Bahir-mātṛkā-nyāsas, i. e. nyāsa of Sṛṣṭi, Sthiti and Saṁhāra; 5. Kalā-mātṛkā; 6. Srikaṇṭha-māṭrakā; 7. Keśava-mātṛkā; 8. Lajjā bīja-mātṛkā; 9. Ramābīja-mātṛkā and 10. Kāma bīja-mātṛkā Nyāsas) should be performed. After that the Rsi etc. Nyāsa of the Sri-parā-prāsāda Mantra should be performed.

ऋषिरस्य परः शम्भुश्छन्दश्चाव्यक्तपूर्विका ।
गायत्री देवता चात्र सर्वमन्त्रेश्वरी परा ॥ १५ ॥
दीर्घत्रययुतं मूलं बीजं शक्तिश्च कीलकम् ।
षड्दीर्घयुक्तमूलबीजेन षडङ्गानि च पार्वति ॥ १६ ॥

Rṣyādi-nyāsa of Srī-parā-prāsāda Mantra :

O Pārvati ! Ṛṣi of this Mantra is Para-Śambhu, Chanda is Avyaktā-Gāyatrī, Devatā is Sarva-mantreśvarī Parā, Bīja,

Śakti and Kīlaka are Mūla bījas with three long Svaras, i. e. Bīja : Hsaṁ Shaṁ; Śakti : Hsīm Shīm; Kīlaka : Hsūṁ Shūṁ. Thereafter, Ṣadaṅga-nyāsa should be performed with the Mūla bījas with long Svaras.

विनियोग : ॐ अस्य श्रीपरा-प्रासादमन्त्रस्य परशम्भुः ऋषिः, अव्यक्ता गायत्री छन्दः, सर्वमन्त्रेश्वरी-परादेवता, ह्सां स्हां बीजं, ह्सीं स्हीं शक्तिः, ह्सूं स्हूं कीलकं, सर्वमन्त्रेश्वरी-परा-देवता-प्रसाद-सिद्धयर्थे विनियोगः ।

ऋष्यादि-न्यास : पर शम्भु ऋषये नमः शिरसि । अव्यक्ता-गायत्री छन्दसे नमः मुखे । सर्वमन्त्रेश्वरी-परा-देवतायै नमः हृदि । ह्सां स्हां बीजाय नमः गुह्ये । ह्सीं स्हीं शक्तये नमः नाभौ । ह्सूं स्हूं कीलकाय नमः लिङ्गे । सर्वमन्त्रेश्वरी-परा-देवता-प्रसाद-सिद्धयर्थे विनियोगाय नमः पादयोः ।

कर-न्यास : ह्सां स्हां अंगुष्ठाभ्यां नमः । ह्सीं स्हीं तर्जनीभ्यां नमः । ह्सूं स्हूं मध्यमाभ्यां नमः । ह्सैं स्हैं अनामिकाभ्यां नमः । ह्सौं स्हौं कनिष्ठिकाभ्यां नमः । ह्सः स्हः कर-तल-कर-पृष्ठाभ्यां नमः ।

षडङ्ग-न्यास : ह्सां स्हां हृदयाय नमः । ह्सीं स्हीं शिरसे स्वाहा । ह्सूं स्हूं शिखायै वषट् । ह्सैं स्हैं कवचाय हुं । ह्सौं स्हौं नेत्र-त्रयाय वौषट् । ह्सः स्हः अस्त्राय फट् ।

ईशतत्पुरुषाघोरसद्योजातात्मनस्तथा ।
पञ्चाङ्गुलिषु विन्यस्य मूर्त्तिं वक्त्रेषु विन्यसेत् ॥ १७ ॥
पञ्चसु ब्रह्मणि तथैवाङ्गविन्यासमाचरेत् ।
आधारशक्तिमारभ्य पीठमन्त्रान्तमम्बिके ॥ १८ ॥
अल्पषोढां कुलेशानि कुर्यात् पूर्वोक्तवर्त्मना ।

Alpa Ṣodhā-nyāsa :

O Ambikā ! Nyāsa with the five fingers should be perfomed for Īśāna, Tatpuruṣa, Aghora, Sadyojāta and Ātmā. Similarly Nyasa should respectively be performed in the Mūrdhā, Mukha, Hṛdaya, Guhya and pāda-deśa respectively with the five fingers beginning with the thumb. These Nyāsas should begin with the Ādhāra-śakti and end with the Pīṭha-Mantra. Thus O Kuleśāni ! one should perform the Alpa-ṣodhā-nyāsa.

The whole process should be as follows :

मूर्ति-न्यास : ॐ ऐं ह्रीं श्रीं ह्सौं स्हौं हों ईशानाय नमः–अंगुष्ठयोः । ॐ-६ हें तत्पुरुषाय नमः–तर्जन्योः । ॐ–६ हुं अघोराय नमः–मध्यमयोः । ॐ-६ हिं वामदेवाय नमः–अनामिकयो । ॐ–६ हं सद्योजाताय नमः–कनिष्ठकयोः ।

Similarly one should perform Nyāsa in Mūrdhā, Mukha, Hṛdaya, Guhya and Pādadeśa also, with thumb and other fingers.

Thereafter in the same order Nyāsa should be performed in the Ūrdhva, Prāk, Dakṣiṇa, Udīcya, and Paścim faces with the thumb and other fingers.

After that Ṣaḍaṅga Nyāsa should be performed with Hsāṁ Hsīṁ etc., and then with Shāṁ Shīṁ etc.

Then Ṣaḍaṅga Nyāsa in the following manner should be performed.

ॐ ऐं ह्रीं श्रीं ह्सौं स्हौं सर्वज्ञाय नमः–अंगुष्ठयोः। ॐ–६ अमृते तेजोमालिनि नित्य-तृप्ताय नमः तर्जन्योः । ॐ-६ ब्रह्म-शिरसे स्वाहा ज्वलित-शिखि शिखा-यानादि-बोधाय नमः मध्यमयोः। ॐ-६ वज्रिणे वज्रहस्ताय स्वतन्त्राय नमः अनामिकयोः। ॐ-६ सौं वौं हौं नित्यमलुप्तशक्तये नमः कनिष्ठकयोः । ॐ-६ श्रीं श्लीं पशुं हुं फट् यित्यमनन्तशक्तये नमः करतलयोः।

In the same order Nyāsa should be performed in the Hṛdaya etc., six organs. Now Nyāsa for the fortyeight Kalās should be performed putting Auṁ before each Mantra. First, the Nyāsa should be performed with the thumb and bound fist :

ॐ ईशानः सर्व-विद्यानां शशिन्यै नमः ऊर्ध्व-वक्त्रे। ईश्वरः सर्व-भूतानां अङ्गदायै नमः पूर्व-वक्त्रे। ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मेष्टदायै नमः दक्ष-वक्त्रे। ब्रह्मा शिवो मे अस्तु मरीच्यै नमः उत्तर-वक्त्रे। सदाशिवोम् अंशुमालिन्यै नमः पश्चिम-वक्त्रे।

Now the Nyāsa should be performed with thumb and first finger joined together.

तत्पुरुषाय विद्महे शान्त्यै नमः पूर्व-वक्त्राधः। महादेवाय धीमहि विद्यायै नमः दक्षिण-वक्त्राधः। तन्नो रुद्रः प्रतिष्ठायै नमः उत्तर-वक्त्राधः। प्रचोदयात् निवृत्यै नमः पश्चिम-वक्त्राधः।

Nyāsas to be performed with thumb and middle finger joined together :

अघोरेभ्यः तमायै नमः हृदि। अथ घोरेभ्यो मोहायै नमः ग्रीवायां। घोर-क्षमायै नमः दक्षांसे। घोरतरेभ्यो निद्रायै नमः वामांसे। सर्वतः शर्वव्याध्यै

नमः नाभौ । सर्वेभ्यो मृत्यवे नमः कुक्षौ । नमस्ते अस्तु क्षुधायै नमः पृष्ठे । रुद्ररूपेभ्यः तृष्णायै नमः वक्षसि ।

Nyāsa to be performed with thumb and ring finger joined together :

वामदेवाय नमो रजायै नमः गुह्ये । ज्येष्ठाय नमः श्रेष्ठाय नमो रक्षायै नमः लिङ्गे । रुद्राय नमो रत्यै नमः दक्षोरौ । कालाय नमो मालिन्यै नमः वामोरौ । कल-विकरणाय नमः काम्यायै नमः दक्ष-जानुनि । विकरणाय नमः शशिन्यै नमः वाम-जानुनि । बल-विकरणाय नमः क्रियायै नमः दक्ष-जंघायां । विकरणाय नमः वृद्ध्यै नमः वाम-जंघाया । बलाय नमः स्थिरायै नमः दक्ष-स्फिचि । बल-प्रमथनाय नमः रात्र्यै नमः वाम-स्फिचि । सर्व-भूत-दमनाय नमो भ्रामिण्यै नमः कट्यां । मनोन्मनाय नमः मोहिन्यै नमः दक्ष-पार्श्वे । उन्मनाय नमो जरायै नमः वाम-पार्श्वे ।

Nyāsa should be performed with thumb and little finger joined together :

सद्योजातं प्रपद्यामि सिद्ध्यै नमः दक्ष-पाद-तले । सद्योजाताय वै नमः ऋद्ध्यै नमः वाम-पाद-तले । भवे लक्ष्म्यै नमः दक्ष-हस्त-तले । भवे धृत्यै नमः वाम-हस्त-तले । नातिभवे मेधायै नमः नासिकायां । भवस्व माम् प्रज्ञायै नमः शिरसि । ॐ भव-प्रभायै नमः दक्ष-बाहौ । उद्भवाय नमः सुधायै नमः वाम-बाहौ ।

महाषोढाह्वयं न्यासं ततः कुर्यात् समाहितः ।
वक्ष्यमाणेन विधिना देवताभावसिद्धये ॥ १९ ॥
यस्य कस्यापि नवोक्तं तव स्नेहाद्वदाम्यहम् ।
प्रपञ्चो भुवनं मूर्तिर्मन्त्रदैवतमातरः ।
महाषोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः ॥ २० ॥

Māha-ṣodhā-nyāsa :

Now for the Siddhi of the Devatā-bhāva one should perform according to rules the Mahā-ṣodhā-nyāsa. This Nyāsa should not be told to any and everyone. I am telling to You out of My love for You. This Nyāsa should be performed with respect of 1. Prapañca ; 2. Bhuvana; 3. Mūrti; 4. Mantra; 5. Daivata; and 6. Mātṛkā. Related to these, these Mahā ṣodhā-nyāsa is the best of all the Nyāsas.

तत्रादौ परमेशानि प्रपञ्चन्यास उच्यते ।
प्रपञ्चद्वीपजलधिगिरिपत्तनपीठकाः ॥ २१ ॥
क्षेत्रं वनाश्रमगुहानदीचत्वरकोद्भिदः ।
स्वेदाण्डजजरायुजा इत्युक्तास्ते हि षोडश ॥ २२ ॥
श्रीर्माया कमला विष्णुवल्लभा पद्मधारिणी ।
समुद्रतनया लोकमाता कमलवासिनी ॥ २३ ॥
इन्दिरा मा रमा पद्मा तथा नारायणप्रिया ।
सिद्धलक्ष्मी राजलक्ष्मीर्महालक्ष्मीरितीरिताः ।
शक्तयस्तु प्रपञ्चानां स्वराणामधिदेवताः ॥ २४ ॥

Prapañca Nyāsa

O Parameśāni ! First of all I am telling You the Prapañca Nyāsa, which should be performed for Śrī, Māyā, Kamalā-Vāṣṇuvallabhā, Padma-dhāriṇī, Samudra-tanayā, Loka-mātā, Kamala-vāsinī, Indira, Māyā, Ramā, Padmā, Nārāyaṇa-priyā, Siddha-Lakṣmī, Rāja-Lakṣmī and Mahā-Lakṣmī respectively in the froms of Prpañca, Dvīpa , Jaladhi, Giri, Pattana, Pīṭha, Kṣetra, Vana, Āśrama, Guhā, Nadī, Gahvara, Udbhija, Svedaja, Aṇḍaja, and Jarāyuj. These Śaktis are the presiding Deities of the Svaras in the Prapañca Nyāsa.

In the beginning of each of the following Mantra ॐ ऐं ह्रीं श्रीं ह्सौं and at the end of each स्हौं श्रीं ह्रीं ऐं ॐ should invariably be added.

अं प्रपञ्च-रूपायै श्रियै नमः शिरसि । आं द्वीपरूपायै मायायै नमः मुख-वृत्ते । इं जलधिरूपायै कमलायै नमः दक्ष-नेत्रे । ई गिरिरूपायै विष्णुबल्लभायै नमः वाम-नेत्रे । उं पत्तन-रूपायै पद्मधारिण्यै नमः दक्ष-कर्णे । ऊं पीठरूपायै समुद्रतनयायै नमः वाम-कर्णे । ऋं क्षेत्र-रूपायै-लोक-मात्रे नमः दक्ष-नासा-पुटे । ॠं बनरूपायै कमलबासिन्यै नमः वाम-नासा-पुटे । ऌं आश्रमरूपायै इन्दि-रायै नमः दक्ष-गण्डे । ॡं गुहारूपायै मायायै नमः वाम-गण्डे । एं नदी-रूपायै रमायै नमः ऊर्ध्वोष्ठे । ऐं चत्वर-रूपायै पद्मायै नमः अधरोष्ठे । ओं उद्भिज-रूपायै नारायण-प्रियायै नमः उर्ध्व-दन्त-पंक्तौ । औं स्वेदज-रूपाये सिद्धि-लक्ष्म्यै नमः अधो-दन्त-पंक्तौ । अं अंडजरूपायै रालक्ष्म्यै नमः जिह्वा-मूले । अः जरायुजरूपायै महालक्ष्म्यै नमः जिह्वाधः ।

लवस्त्रुटिः कला काष्ठा निमेषः श्वास एव हि ।
घटिका च मुहूर्त्तश्च प्रहरो दिवसस्तथा ॥ २५ ॥

सन्ध्या रात्रिस्तिथिश्चैव वारो नक्षत्रमेव च ।
योगश्च करणं पक्षौ मासो राशिर्ऋतुस्तथा ॥ २६ ॥
अयनं वत्सरयुगप्रलयाः पञ्चविंशतिः ।
एतेषां स्थननियमो हृदयान्तः समीरितः ॥ २७
आर्योमा चण्डिका दुर्गा शिवाऽपर्णाऽम्बिका सती ।
ईश्वरी शाम्भवीशानी पार्वती सर्वमङ्गला ॥ २८ ॥
दाक्षायणी हैमवती महामाया महेश्वरी ।
मृडानी चैव रुद्राणी सर्वाणी परमेश्वरी ॥ २९ ॥
काली कात्यायनी गौरी भवानीति समीरिता ।
शक्तयः स्युर्लवादीनां स्पर्शानामधिदेवताः ।
एतासां स्थाननियमो हृदयान्तः समीरितः ॥ ३० ॥

The Nyāsa in the different parts of the body should be performed with the consonants Ka to Ma. Here the Presiding Deities Ārya, Umā, Caṇḍikā, Durgā, Śivā, Aparṇā, Ambikā, Satī, Īśvarī, Śāmbhavī, Īśānī, Pārvatī, Sarvamaṅgalā, Dākṣāyaṇī, Mahāmāyā, Maheśvarī, Mṛḍaṇī. Rudrāṇī, Sarvāṇī, Parameśvarī, Kālī, Kātyāyanī, Gaurī, and Bhavānī in the forms of Lava, Truṭi, Kalā, Kāṣthā Nimeṣa, Śvāsa, Ghaṭikā, Muhūrta, Prahara, Divasa, Sndhyā. Rātri, Tithi, Vāra, Nakṣatra, Yoga, Karaṇa, Pakṣa, Māsa, Rāṣi, Ṛtu, Ayana, Vatsara, Yuga, and Pralaya respectively. These are twentyfive in number. There Nyāsa should be perfomed according to the rules, from Dakṣa-bāhu-mūla to Hṛdaya.

कं लवरूपायै आर्यायै नमः वक्ष-बाहु-मूले । खं त्रुटिरूपायै उमायै नमः दक्ष-कूर्परे । गं कलारूपायै चण्डिकायै नमः दक्ष-मणि-बन्धे । घं काष्ठा-रूपायै दुर्गायै नमः दक्षांगुलि-मूले । ङं निमेष-रूपायै शिवायै नमः दक्षांगुल्यग्रे ।

चं श्वास-रूपायै अपर्णायै नमः वाम-बाहु-मूले । छं घटिका-रूपायै अम्बिकायै नमः वाम-कूर्परे । जं मुहूर्त-रूपायै सत्यै नमः वाम-मणि-बन्धे । झं प्रहर-रूपायै ईश्वर्यै नमः वामांगुलि-मूले । ञं दिवस-रूपायै शाम्भव्यै नमः वामांगुल्यग्रे ।

टं सन्ध्या-रूपायै ईशान्यै नमः दक्ष-पाद-मूले । ठं रात्रि-रूपायै पार्वत्यै नमः दक्ष-जंघायाम् । डं तिथि-रूपायै सर्व-मङ्गलायै नमः दक्ष-गुल्फे । ढं वार-रूपायै

दाक्षायण्यै नमः दक्ष-पादांगुलि-मूले। णं नक्षत्र-रूपायै हैमवत्यै नमः दक्ष-पादांगुल्यग्रे।

तं योगरूपायै महामायायै नमः वाम-पाद-मूले। थं करणरूपायै माहेश्वर्यै नमः वाम-जंघायाम्। दं पक्षरूपायै मृडान्यै नमः वाम-गुल्फे। धं मासरूपायै रुद्राण्यै नमः वाम-पादांगुलि-मूले। नं राशि-रूपायै शर्वाण्यै नमः वामपादांगुल्यग्रे।

पं ऋतु-रूपायै परमेश्वर्यै नमः दक्ष-कुक्षौ। फं अयन-रूपायै काल्यै नमः वाम-कुक्षौ। बं वत्सर-रूपायै कात्यायन्यै नमः पृष्ठ-वंशे। भं युग-रूपायै गौर्यै नमः नाभौ। मं प्रलय-रूपायै भवान्यै नमः हृदये।

पञ्चभूतानि तन्मात्रं ज्ञानकर्मेन्द्रियाणि च।
गुणान्तःकरणावस्था ध्यायेद्दोषान् दशानिलान्॥ ३१॥
ब्राह्मी वागीश्वरी वाणी सावित्री च सरस्वती।
गायत्री वाक्प्रदा पश्चात् सारदा भारती प्रिये।
विद्यात्मिका पञ्चभूतव्यापकानामधीश्वराः॥ ३२॥
वाग्भवं भुवनेशाञ्च लक्ष्मीबीजं त्रितारकम्।
त्रितारमूलविद्यान्त मातृकाक्षरतः परम्॥ ३३॥
वदेत् प्रपञ्चरूपायै श्रियै नम इति क्रमात्।
प्रपञ्चादिभिरायोज्य वर्णान शक्तीर्नियोजयेत्।
मातृकान्याससंप्रोक्तस्थानेष्वेवं न्यसेत् प्रिये॥ ३४॥
त्रितारमूलसकलप्रपञ्चादि स्वरूपतः।
आयै पराद्यादेव्यैनम उक्त्वा व्यापकं न्यसेत्॥ ३५॥

Now the Nyāsa should be performed in respect of Brāhmī, Vāgīśvarī, Vāṇī, Sāvitrī, Sarasvatī, Gāyatrī, Vākpradā, Śāradā, Bhāratī, Vidyātmikā, who are the Presiding Deities of the Five Elements and in other parts comprehensively. For this Nyāsa the Bījas from Vāgbhava, Bhuvaneśi, Lākṣmi, Tritāraka, and all Mulabījas together i. e. Ya, Ra, La, Va, Śa, Ṣa' Śa, Ha La, Kṣa and A to Kṣa should be taken.

यं पृथिव्यप्तेजो-वाय्वाकाशाख्य-पञ्चभूतरूपायै ब्राह्म्यै नमः दक्षांसे। रं शब्द-स्पर्श-रूप-रस-गन्धाख्य-पञ्चतन्मातृ-रूपायै वागीश्वर्यै नमः वामांसे। लं वाक्-पाणि-पाद-पायूपस्थाख्य-पञ्च-कर्मेन्द्रिय-रूपायै वाण्यै नमः अपर-गले। वं श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणाख्य-पञ्च-ज्ञानेन्द्रिय-रूपायै सावित्र्यै नमः दक्ष-कक्षे।

शं प्राणापान-व्यानोदान-समानाख्य-पञ्चप्राण-रूपायै सरस्वत्यै नमः वाम-कक्षे। षं सत्त्व-रज-तमाख्य-गुणत्रय-रूपायै गायत्र्यै नमः हृदयादि-दक्ष-पाणि-पर्यन्तं। सं मनोबुद्ध्यहङ्कारचित्ताख्यान्तःकरण-चतुष्टय-रूपायै वाक्-प्रदायै नमः हृदयादि,वाम-पाणि-पर्यन्तं। हं जाग्रत्-स्वप्न-सुषुप्ति-तुरीयावस्था-चतुष्टय-रूपायै शारदायै नमः हृदयादि-दक्ष-पादान्तं। लं त्वगसृग्मांस-मेदोऽस्थि-मज्जा-शुक्राख्य-सप्त-धातु रूपायै भारत्यै नमः हृदयादि-वाम-पादान्तं। क्षं वात-पित्त-श्लेष्माख्य-दोषत्रयरूपायै विद्यात्मिकायै पञ्चभूत व्यापिकाधीश्वर्यै नमः हृदयादि-भ्रूयुगान्तं। अं····क्षं मूलं सकल-प्रपञ्च-रूपायै पराम्बा-देव्यै नमः सर्वाङ्गे व्यापकं।

प्रपञ्चन्यास एव स्याद् भुवनन्यास उच्यते।
त्रितारमूलमन्त्रान्ते अ आं इं अतलं वदेत् ॥ ३६ ॥
लोकञ्च निलयश्चैव शतकोटिपदं ततः।
गुह्याद्या योगिनी मूलङेयुतन्तु वदेत् प्रिये ॥ ३७ ॥
वदेदाधारशक्त्यम्बादेव्यै च पादयोर्न्यसेत्।
ईं उं ऊं वितलं गुह्यतरं चानन्तसंज्ञकम्।
शेषञ्च पर्ववत् प्रोच्य गुल्फयोर्देवि विन्यसेत् ॥ ३८ ॥
ऋं ॠं ऌं सुतलञ्चातिगुह्यं चाविन्त्यसंज्ञकम्।
शेषञ्च पूर्ववत् प्रोच्य जङ्घयोर्विन्यसेत् प्रिये ॥ ३९ ॥
ॡं एं ऐं महातलञ्च महागुह्यं पदं ततः ः।
शेषञ्च पूर्ववत् प्रोच्य देवि जान्वोः प्रविन्यसेत् ॥ ४० ॥
ओं औं तलातलं देवि परं गुह्याभिधानकम्।
शेषञ्च पूववत् प्रोच्य ऊर्वोर्देवेशि विन्यसेत् ॥ ४१ ॥
अं अः रसातलञ्चैव रहस्यं ज्ञानसंज्ञकम्।
शेषञ्च पूर्ववत् प्रोच्य गुह्यदेशे प्रविन्यसेत् ॥ ४२ ॥
कवर्गेणापि पातालं लोकेति निलयेति च।
शेषञ्च पूर्ववत् प्रोच्य मूलाधारे तु विन्यसेत् ॥ ४३ ॥
चवर्ग भूतलञ्चेति रहस्यं डाकिनीमपि।
शेषञ्च पूर्ववत् प्रोच्य स्वाधिष्ठाने न्यसेत् प्रिये ॥ ४४ ॥
टवर्गेण भुवो लोकं रहस्यं राकिणीमपि।
शेषञ्च पूर्ववत् प्रोच्य नाभौ च विन्यसेत् प्रिये ॥ ४५ ॥
तवर्ग स्वश्च परमरहस्य लाकिनीमपि।
शेषञ्च पूर्ववत् प्रोच्य हृदये विन्यसेत् प्रिये ॥ ४६ ॥

पवर्गञ्च महर्लोकं रहस्यं काकिनीमपि ।
शेषञ्च पूर्ववत् प्रोच्य तालुमूले न्यसेत् प्रिये ।। ४७ ॥
यवर्गञ्च जनो गुप्ततरञ्च शाकिनीमपि ।
शेषञ्च पूर्ववत् प्रोच्य आज्ञायाञ्च न्यसेत् प्रिये ॥ ४८ ॥
शवर्गञ्च तपश्चातिगुह्यञ्च हाकिनीमपि ।
शेषञ्च पूर्ववत् प्रोच्य ललाटे विन्यसेत् प्रिये ।। ४९ ॥
लं क्षं सत्यं महागुह्यं यक्षिणीमपि च प्रिये ।
शेषञ्च पूर्ववत् प्रोच्य ब्रह्मरन्ध्रे च विन्यसेत् ॥ ५० ॥
त्रितारमूलमन्त्रान्ते चतुर्दशभुवं वदेत् ।
नाधिपायै श्रीपरायै देव्यै च व्यापकं न्यसेत् ॥ ५१ ॥

Bhuvana Nyāsa :

Foregoing has been the procedure of Prapañca-nyāsa. Now I am telling the Bhuvana-nyāsa. First of all taking the Mūla-mantra Aiṁ Hrīṁ Śrīṁ Hsauḥ and thereafter putting Aṁ Āṁ Iṁ, one should add *Atala-loka nitya-śatakoṭi-Guhyākhyā-Yoginī-devatā yutādhāra-(Ādhāra-) śaktyambā-devyai.* With this Mantra one should perform Nyāsa in the feet. Then after the Mūla-mantra *Iṁ Uṁ Ūṁ vitala* should be put and the rest as before. With this the Nyāsa in tha Gulpha should be performed. Similarly Nyāsas with the respective Mantras given below should be performed in other parts of the body. The Mantras and the bodily parts in which the Nyāsa has to be performed, are as follows. However Aiṁ Hrīṁ Śrīṁ Hsauḥ should invariably be added in the beginning of each of the Mantras.

अं आं इं अतल-लोक-निलय-शत-कोटि-गुह्याख्य-योगिनी-देवता-युताधार-शक्त्यम्बा-देव्यै नमः पादयोः । ईं उं ऊं वितल-लोक-निलय-शत-कोट्यति-गुह्य-योगिनी-मूल-देवता-युतानन्त-शक्त्यम्बा-देव्यै नमः गुल्फयोः । ऋं ॠं लृं सुतल-लोक-निलय-शत-कोट्यति-गुह्य-योगिनी-मूल-देवता युताचिन्त्य-शक्त्यम्बा-देव्यै नमः जंघयोः । ॡं एं ऐं महातललोकनिलयशतकोटिमहागुह्याख्य-योगिनी-मूल-देवता-युत-स्वातंत्र्य-शक्त्यंबा-देव्यै नमः जान्वोः । ओं औं तलातल-लोक-निलय-शत कोटि रहस्य योगिनी मूलदेवता युत परम गुह्येच्छा शक्त्यम्बा देव्यै नमः ऊर्वोः । अं अः रसातल लोक निलय शत कोटि रहस्य योगिनी मूल देवता युत

ज्ञान शक्त्यम्बा देव्यै नमः गुह्ये। कं-५ पाताल लोक निलय शत कोटि रहस्याति रहस्य योगिनी मूल देवता युत क्रिया शक्त्यम्बा देव्यै नमः मूलाधारे। चं-५ भूर्लोक निलय शत कोट्यति रहस्य योगिनी मूल देवता युत श्रीडाकिनी शक्त्यम्बा देव्यै नमः स्वाधिष्ठाने। टं-५ भुवर्लोक निलय शत कोटि महारहस्य योगिनी मूल देवता युत श्रीराकिणी शक्त्यम्बा देव्यै नमः नाभौ। तं-५ स्वर्लोक निलय शत कोटि परम रहस्य योगिनी मूल देवता युत लाकिनी शक्त्यम्बा देव्यै नमः हृदये। पं-५ महर्लोक निलय शत कोटि गुप्त योगिनी मूल देवता युत श्रीकाकिनी शक्त्यम्बा देव्यै नमः तालु मूले। यं-४ जन लोक निलय शत कोटि गुप्तत्तर योगिनी मूल देवता युत श्रीशाकिनी शक्त्यम्बा देव्यै नमः आज्ञायाम्। शं-४ तपोलोक निलय शत कोट्यति गुप्त योगिनि मूल देवता युत हाकिनी शक्त्यम्बा देव्यै नमः ललाटे। लं क्षं सत्य लोक निलय शत कोटि महा गुप्त योगिनी मूल देवता युत याकिनी शक्त्यम्बा देव्यै नमः ब्रह्मरन्ध्रे। अं····क्षं चतुर्दश भुवनाधिपाये श्रीपराम्बा देव्यै नमः सर्वाङ्गे व्यापकं।

कृत्वैवं भुवनन्यासं मूर्त्तिन्यासमथाचरेत्।
केशवनारायणमाधवगोविन्दविष्णवः ॥ ५२ ॥
मधुसूदनसंज्ञश्च स्यात्त्रिविक्रमवामनौ।
श्रीधरश्च हृषीकेशः पद्मनाभो दामोदरः।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ ५३ ॥
अक्षोल्केन्द्राणी चेशानी चोग्रार्द्धनयना तथा।
ऋद्धिश्च रूपिणी लूका नूनदोषैकनायिका ॥ ५४ ॥
ऐङ्कारिणी चौघवती सर्वकामाञ्जनप्रभा।
अस्थि मालाधरा चेति सम्प्रोक्ताः स्वरदेवताः ॥ ५५ ॥
भवः शर्वोऽथ रुद्रश्च पशुपतिश्चोग्र एव च।
महादेवस्तथा भीम ईशस्तत्पुरुषाह्वयः॥
आघोरसद्योजातौ च वामदेव इतीरिताः ॥ ५६ ॥
करभद्रा खगचला गरिमादिफलप्रदा।
घण्टाधरोग्रनयना चन्द्रधत्री ततः परम्।
छन्दोमयी जगत्स्थाना ज्वलत्तारा ततः परम् ॥ ५७ ॥
ज्ञानदा च टङ्कधरा धृतिर्द्वादश ईरिताः।
कभादीनां ठडान्तानां वर्गानां देवतास्त्विमाः ॥ ५८ ॥
ब्रह्मा प्रजापतिर्वेधाः परमेष्ठी पितामहः।

विधाता च विरिञ्चिश्च स्रष्टा च चतुराननः ॥
हिरण्यगर्भ इत्युक्ताः क्रमाद् ब्रह्मादयो दश ॥ ५९ ॥
यक्षिणी रञ्जिनी लक्ष्मीवज्रिणी शशिधारिणी ।
षडाधारलया सर्वनायिका हसिताननाः ।
ललिता च क्षमा चेति प्रोक्ता याद्यर्गदेवताः ॥ ६० ॥
त्रितारमूलमन्त्रान्ते स्वरान् विष्णून् सशक्तिकान् ।
चतुर्थ्या नमसा युक्तान् मस्तके चानने न्यसेत् ॥ ६१ ॥
सस्कन्धपार्श्वकट्यूरु जानुजङ्घापदेषु च ।
दक्षादिवामपर्यन्तं विन्यसेत् परमेश्वरि ॥ ६२ ॥
कभाद्यर्णयुतान् मन्त्री भवादीन शक्तिसंयुतान् ।
पादपार्श्वबाहुकण्ठपञ्चवक्त्रेषु विन्यसेत् ।
दशाधारेषु ब्रह्मादीन् यादि शक्तियुतान्न्यसेत् ॥ ६३ ॥
त्रितारमूलमन्त्रान्ते श्रीत्रिमूर्त्यम्बिकां वदेत् ।
आये पराम्बादेव्यै च नमसा व्यापकं न्यसेत् ॥

After performing the Bhuvana Nyāsa in the aforesaid manner one should perfom Mūrti Nyāsa. The formula for each Nyāsa and the parts of the body where the Nyāsa is to be performed should be as follows. Here also, Aiṁ, Hrīṁ Śrīṁ Hsauḥ should be prefixed to each of the Mantras.

अं केशवाक्षर-शक्तिभ्यां नमः ललाटे । आं नारायणाद्याभ्यां नमः दक्ष-मुखे । इं माधवेष्टदाभ्यां नमः दक्ष स्कंधे । ईं गोविन्देशानीभ्यां नमः दक्ष कुक्षौ । उं विष्णुग्राभ्यां नमः दक्षिणोरौ । ऊं मधुसूदनोर्ध्व नयनाभ्यां नमः दक्ष जानुनि । ऋं त्रिविक्रम ऋद्धिभ्यां नमः दक्ष जङ्घायाम् । ॠं वामन रूपिणीभ्यां नमः दक्ष पादे । लृं श्रीधर लुप्ताभ्यां नमः वाम पादे । ॡं हृषीकेश लूनदोषाभ्यां नमः वाम जङ्घायाम् । एं पद्मनाभैक नायिकाभ्यां नमः वाम जानुनि । ऐं दामोदरैङ्कारिणीभ्यां नमः वामोरौ । ओं वासुदेवोधवतीभ्यां नमः वाम कुक्षौ । औं सङ्कर्षण सर्वकामाभ्यां नमः वाम स्कंधे । अं प्रद्युम्नाञ्जन प्रभाभ्यां नमः वाम मुखे । अः अनिरुद्धास्थि माला धराभ्यां नमः वाम मस्तके । कं भं भव कर भद्राभ्यां नमः दक्ष पादे । खं बं शर्व खग बलाभ्यां नमः वाम पादे । गं फं रुद्र गरिमादि फल प्रदाभ्यां नमः दक्ष पार्श्वे । घं पं पशुपति धर्म प्रशमनीभ्यां नमः वाम पार्श्वे । ङं नं उग्र पंक्ति नाशाभ्यां नमः दक्ष बाहौ । चं धं महादेव चन्द्रार्ध धारिणीभ्यां नमः वाम बाहौ । छं दं भीम छन्दोमयीभ्यां नमः कंठे ।

जं थं ईशान जगत्स्थानाभ्यां नमः ऊर्ध्वास्ये। झं तं तत्पुरुष ज्वलत्ताराभ्यां नमः पूर्वास्ये। ञं णं अघोर ज्ञान फल प्रदाभ्यां दक्षिणास्ये। टं ढं सद्योजात टङ्क धराभ्यां नमः पश्चिमास्ये। ठं डं वामदेव टङ्कार डामरीभ्यां नमः वामास्ये। यं ब्रह्मा यक्षिणीभ्यां नमः मूलाधारे। रं प्रजापति रंजिनीभ्यां नमः स्वाधिष्ठाने। लं वेधाः लक्ष्मीभ्यां नमः मणिपूरे। वं परमेष्ठि वज्रिणीभ्यां नमः अनाहते। शं पितामह शशि धारिणीभ्यां नमः विशुद्धौ। षं विधातृ षडाधाराभ्यां नमः आज्ञायाम्। सं विरिञ्चि सर्व नायिकाभ्यां नमः इन्दौ। हं स्रष्टृ हसिताननाभ्यां नमः बिन्दौ। लं चतुरानन ललिताभ्यां नमः नादे। क्षं हिरण्यगर्भ क्षमाभ्यां नमः नादान्ते। अं....क्षं हरि हर ब्रह्माख्य त्रिमूर्त्यात्मिकायै परात्मा देव्यै नमः सर्वाङ्गे व्यापकं।

मूर्तिन्यासं विधायेत्थं मन्त्रन्यासं समाचरेत् ॥ ६४ ॥
त्रितारमूलं अं आं इं एकलक्षञ्च कोटि च।
भेदश्च प्रणवाद्येकाक्षरात्माखिलमन्त्रतः ॥ ६५ ॥
ततोऽधिदेवतायै स्यात् सकलञ्च फलप्रदाम्।
आयै तथैककूटेश्वर्यम्बादेव्यै नमो वदेत् ॥ ६६ ॥
ईं उं ऊं आदि हंसादि द्विकूटं पूर्ववत् परम्।
ऋं ॠं लृं आदि वह्न्यादि त्रिकूटं पूर्ववत् परम् ॥ ६७ ॥
ॡं एं ऐं चतुर्लक्षं चन्द्रादि पूर्ववत् परम्।
ओं औं अं अः पञ्चलक्षं सूर्यादि पूर्ववत् परम् ॥ ६८ ॥
कं खं गं चैव षड्लक्षं स्कन्दादि पूर्ववत् परम्।
घं ङं चं सप्तलक्षं गणेशादि पूर्ववत् परम्। ॥ ६९ ॥
छं जं झं अष्टलक्षं वटुकादि पूर्ववत् परम्।
ञं टं ठं नवलक्षञ्च ब्रह्मादि पूर्ववत् परम् ॥ ७० ॥
डं ढं णं दशलक्षञ्च विष्ण्वादि पूर्ववत् परम्।
तं थं दं एकादशलक्षं रुद्रादि पूर्ववत् परम् ॥ ७१ ॥
धं नं पं द्वादशलक्षं वाण्यादि पूर्ववत् परम्।
फं बं भं त्रयोदशलक्षं लक्ष्म्यादि पूर्ववत् परम् ॥ ७२ ॥
मं यं रं चतुर्दशलक्षं गौर्यादि पूर्ववत् परम्।
लं वं शं पञ्चदशलक्षं दुर्गादि पूर्ववत् परम्।
षं सं हं लं क्षं षोडशलक्षं त्रिपुरादि च षोडश ॥ ७३ ॥
अक्षरात्मा खिलमन्त्राधिदेवतायै सकलं ततः।
तथा फलप्रदायै च षोडश कूटेश्वरी पुनः ॥ ७४ ॥

अम्बादेव्यै नमः प्रोक्तो मन्त्रन्यासो महेश्वरि ।
आधारलिङ्गयोर्नाभिहृत्कण्ठे नेत्रयोरपि ॥ ७५ ॥
निबोधिकायामर्द्धेन्दौ बिन्दौ चैव कलापदे ।
उन्मन्यां विष्णुवक्त्रे च नादे नादान्त एव च ।
ध्रुवमण्डलदेशे च विन्यसेत् कुलनायिके ॥ ७६ ॥
त्रितारमूलमन्त्रान्ते सर्वमन्त्रात्मिकापदम् ।
आद्यै पराम्बादेव्यै च हृदये व्यापकं न्यसेत् ॥ ७७ ॥

Mantra Nyāsa :

After Mūrti Nyāsa the Mantra Nyāsa should be performed next in the following manner. Here also Aiṁ Hrīṁ Śrīṁ Hsauḥ should be prefixed to each Mantra.

अं आं इं एक लक्ष कोटि भेद प्रणवाद्येकाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै नमः सकल फल प्रदायै एक कूटेश्वर्यम्बा देव्यै नमः मूलाधारे। ईं उं ऊं द्वि लक्ष कोटि भेद हंसादि द्व्यक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै नमः सकल फल प्रदायै द्वि कूटेश्वर्यम्बा देव्यै नमः लिंगे। ऋं ॠं लृं त्रि लक्ष कोटि भेद वह्न्यादि त्र्यक्षरात्मिकायै नमः अखिल मन्त्रादि देवतायै सकल फल प्रदायै त्रिकूटेश्वर्यम्बायै नमः नाभौ। ॡं एं ऐं चतुर्लक्ष कोटि भेद चन्द्रादि चतुरक्षरात्मिकायै नमः अखिल मन्त्राधिदेवतायै सकल फल प्रदायै चतुः कूटेश्वर्यम्बा देव्यै नमः हृदये। ओं औं अं अः पञ्च लक्ष कोटि भेद सूर्यादि पञ्चाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल गल प्रदायै पञ्चकूटेश्वर्यम्बा देव्यै नमः कण्ठे। कं खं गं षड् लक्ष कोटि भेद स्कन्दादि षडक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै षट् कूटेश्वर्यम्बा देव्यै नमः मुखे। घं ङं चं सप्त लक्ष कोटि भेद गणेशादि सप्ताक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै सप्त कूटेश्वर्यम्बा देव्यै नमः नेत्रयोः। छं जं झं अष्ट लक्ष कोटि भेद वटुकाद्यष्टाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै अष्ट कूटेश्वर्यम्बा देव्यै नमः आज्ञायाम्। ञं टं ठं नव लक्ष कोटि भेद ब्रह्मादि नवाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै नव कूटेश्वर्यम्बा देव्यै नमः इन्दौ। डं ढं णं दश लक्ष कोटि भेद विष्ण्वादि दशाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै दश कूटेश्वर्यम्बा देव्यै नमः बिन्दौ। तं थं दं एकादश लक्ष कोटि भेद रुद्राद्येकादशाक्षरात्मिकायै नमः अखिल मन्त्राधि देवतायै सकल फल प्रदायै एकादश कूटेश्वर्यम्बा देव्यै नमः कलायां। धं नं पं द्वादश लक्ष कोटि भेद सारस्वत्यादि द्वादशाक्षरात्मिकायै नमः अखिल मन्त्राधि

